# Shri Sarvamangalamahabaleshvarastavah

# શ્રીસર્વમઙ્ગલામહાબલેશ્વરસ્તવઃ

## Document Information


Text title : sarvamangalAmahAbaleshvarastavaH

File name : sarvamangalAmahAbaleshvarastavaH.itx

Category : devii, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, devI, shiva, mangala

Location : doc_devii

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીસર્વમઙ્ગલામહાબલેશ્વરસ્તવઃ

(શ્રીગોકર્ણક્ષેત્રે)

સર્વાણિ મઙ્ગલાન્યપિ યત્ત્વં પ્રદદાસિ નમ્રજનતાયૈ ।
તસ્માદાખ્યા સમભૂન્માતસ્તવ સર્વમઙ્ગલેત્યેવ ॥ ૧॥

માતુઃ સુતેષુ કરુણા સહજા ન હિ કારણાન્તરાદ્ભવતિ ।
રહિતેઽપિ ભક્તિગન્ધેનાતનુ કરુણાં મયીહ કરુણાબ્ધે ॥ ૨॥

પરાઙ્ગનાં નૌમિ સુરાઙ્ગનેડ્યાં મહેશવામાઙ્કનિવાસશીલામ્ ।
પરાં હિ સિદ્ધિં ત્વરિતં મનુષ્યાઃ પ્રયાન્તિ યસ્યાઃ પ્રણતેઃ કદાચિત્ ॥ ૩॥

વિલોક્ય ચન્દ્રં હિ ચકોરમુખ્યાઃ પ્રયાન્તિ તૃપ્તિં તુ કદાચિદમ્બ ।
તવાસ્યચદ્રં તુ વિલોક્ય નમ્રાઃ પ્રયાન્તિ તૃપ્તિં ન કદાપિ લોકે ॥ ૪॥

મહાબલેશમાહાત્મ્યં વક્તું શક્નોતિ કઃ પુમાન્ ।
યદ્ભયાદર્યમાપ્યસ્ય પશ્ચાદ્ભાગ ઉદેષ્યતિ ॥ ૫॥

ચિત્રં તવ ચારિત્રં મચ્ચિત્તે ભાતિ ગૌરીશ ।
દેવોઽપિ મહાન્ભૂત્વા ગોકર્ણે વસસિ યસ્માત્ત્વમ્ ॥ ૬॥

હારો ભવતુ હારોઽયમિતિ બુદ્ધ્યા સમર્પિતઃ ।
ત્વયા હર ગૃહીતેઽસ્મિન્હારત્વં નાન્યથા ખલુ ॥ ૭॥

હારેઽસ્મિન્હારપદં રૂઢં જાગર્તિ યૌગિકં નૈવ ।
પરિગૃહ્ય યૌગિકં તત્સમ્પાદય પાર્વતીનાથ ॥ ૮॥

મહાવિભવદાયક પ્રણમતાં જનાનાં દ્રુતં
મહાહરિમુખામરપ્રણતપાદપઙ્કેરુહ ।
મહાઘતિમિરચ્છટાદિનમણે કૃપામ્ભોનિધે
મહાબલ મહાપ્રભો મયિ કૃપામપારાં કુરુ ॥ ૯॥

ઇતિ શ ૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-

ભારતીસ્વામિભિઃ વિરચિતઃ શ્રીસર્વમઙ્ગલામહાબલેશ્વરસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by PSA Easwaran

---

*Shri Sarvamangalamahabaleshvarastavah*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*